# भारतीय-संस्कृतिः

## लघु-अतिलघूत्तरीयप्रश्नोत्तराणि

## भारतीय संस्कृतौ

### लघूत्तरात्मका अति लघूत्तरात्मका केचन प्रश्नास्तेषामुत्तराणि च

**प्रश्नः १ संस्कृति शब्दः केन प्रकारेण व्युत्पद्यते?**

**उत्तरम्–** सम्पूर्वकात् कृधातोः क्तिनि अलङ्करणार्थे सुडागमे च कृते संस्कृति शब्दो व्युत्पद्यते।

**प्रश्न २– संस्कृति शब्दे सुडागमः कस्मिन्र्थे केन सूत्रेण च भवति?**

**उत्तरम्–** संस्कृतिशब्दे सुडागमः 'सम्परिभ्यां करोतौ भूषणे' 'समवाये च' इति पाणिनि सूत्राभ्यां भूषणे समवाये चार्थे भवति।

**प्रश्न ३– संस्कृतिशब्दः कस्मिन् वेदे संदृश्यते?**

**उत्तरम्–** संस्कृतिशब्दः 'सा संस्कृतिः प्रथमा विश्ववारा' इत्युक्तिरूपेण यजुर्वेदे संदृश्यते।

**प्रश्नः ४– 'सा संस्कृतिर्विश्ववारा' इत्युक्ति। कमर्थमभिव्यनक्ति?**

**उत्तरम्–** 'सा संस्कृतिर्विश्ववारा' इत्युक्त्या ध्वनितो भवति यति सैव संस्कृतिः संस्कृतिशब्दवाच्या यया विश्वस्य संरक्षणं स्यादिति।

**प्रश्नः ५– आङ्गलभाषायां संस्कृतिशब्दस्य कृते कस्य शब्दस्य प्रयोगो भवति?**

**उत्तरम्–** आङ्गलभाषायां संस्कृतिशब्दस्य कृते 'कल्चर' इति शबदस्य प्रयोगो भवति।

**प्रश्नः ६– चरित्रविषयमाधारीकृत्य आचार्योमनुः किं निगदति?**

**उत्तरम्–** चरित्रविषयमाधारीकृत्य मनुरित्थं ब्रूते–

**एतद्देशप्रभूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। इति।**

Scanned with CamScanner

**प्रश्नः ७– भारतीयायाः संस्कृते सौन्दर्यमवलम्ब्य कमपि श्लोकं लिखत?**

**उत्तरम्– सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥**

**प्रश्नः ८– वर्ण व्यवस्थामाधारीकृत्य पुरुषसूक्तस्य कस्मिन् मन्त्रे ब्राह्मणक्षत्रियवैश्यशूद्रइत्ये तेषां चतूर्णां जातीनां समुल्लेखो विद्यते?**

**उत्तरम्– ब्राह्ममणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रोऽजायत॥ इति।**

**प्रश्नः ९– संस्कृतिशब्दस्य कोऽर्थो भवितुमर्हति?**

**उत्तरम्–** मानवजीवनवन्ननिर्देशिका विचाराचारव्यवहारसमुदिता क्रियैव संस्कृतिरिति निर्गलितोऽर्थो भवितुमर्हति।

**प्रश्नः १०– भारतीय संस्कृतेः मूलतत्त्वं कुत्र संतिष्ठते?**

**उत्तरम्–** भारतीय संस्कृतेः मूलतत्त्वं वेदेषु संनिहितं विद्यते।

**प्रश्नः ११– वेदाः कतिसंख्याकाः विद्यन्ते के च ते?**

**उत्तरम्–** वेदाश्चत्वारो विद्यन्ते– ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति।

**प्रश्नः १२– पुराणानि कति वर्तन्ते?**

**उत्तरम्–** अष्टादश संख्याकानि पुराणानि वर्तन्ते।

**प्रश्नः १३– 'आर्य' इतिपदेन किं निगद्यते?**

**उत्तरम्– कर्तव्यमाचरन् कार्यमकर्तव्यमनाचरन्।**
**तिष्ठति प्रकृताचोर स आर्य इति कथ्यते॥ इति।**

**प्रश्नः १४– सभ्यता शब्दः कथं निष्पद्यते?**

**उत्तरम्–** सभ्यताशब्दः सभासु साधुरिति विग्रहे सभाशब्दाद्यत्प्रत्यये सिद्धत्सम्पाशब्दाद् भावेऽर्थे तल्प्रत्ययेन सिद्ध्यति यस्यार्थः पर्यवस्यति समायांस्थिनेर्योग्यता।

**प्रश्नः १५– संस्कृतिसभ्यतयोः को भेदो विद्यते?**

**उत्तरम्–** संस्कृतिर्हि आत्मिकोभ्युत्थान पथप्रदर्शिका सभ्यता न शारीरिकावस्थायां मनोविकाराणाञ्च बोधिका। संस्कृतिरभ्यन्तरा सभ्यता च वाह्या।

Scanned with CamScanner

**प्रश्नः १६— पुरा भारतवर्षस्य परिधिः कुत्र पर्यन्तमासीत्?**

**उत्तरम्— उत्तरे सत्समुद्रस्य हिताद्रेश्चैव दक्षिनम्।**
**वर्ष तद्‌भारतं नाम भारती यत्र सन्ततिः॥ (विषणुपुराण)**

**प्रश्नः १७— धर्मस्य मूलं कुत्र भवितुमर्हति?**

**उत्तरम्—** वेदोऽखिलो धर्ममूलं भवितुमर्हति।

**प्रश्नः १८— धर्मस्य का परिभाषा सर्वमान्या भवितुमर्हति?**

**उत्तरम्—** 'यतोऽभ्युदयनिः श्रेयससिद्धिः स धर्मः' इति परिभाषा सर्वमान्या भवितुमर्हति।

**प्रश्नः १९— दशकं धर्मलक्षणं किं विद्यते?**

**उत्तरम्— ''धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रिय निग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्''॥**

**प्रश्नः २०— ज्ञानविज्ञानयोरन्तरं लिखत।**

**उत्तरम्—** 'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोंः'।

**प्रश्नः २१— संस्काराः कति संख्याकाः विद्यन्ते?**

**उत्तरम्—** संस्काराः षोडशसंख्याकाः विद्यन्ते।

**प्रश्नः २२— भारतीय संस्कृतेः आदिकाव्यं किमस्ति?**

**उत्तरम्—** भारतीय संस्कृतेः आदिकाव्यं महर्षि वाल्मीकि प्रणीतं रामायणं महाकाव्यमस्ति।

**प्रश्नः २३— महाभारतं केन प्रणीतम्?**

**उत्तरम्—** महाभारतं महर्षिव्यासेन प्रणीतम्।

**प्रश्नः २४— रामायणं कः विरचितवान्?**

**उत्तरम्—** रामायणं महर्षि वाल्मीकिः विरचितवान्।

**प्रश्नः २५— वाल्मीकिरामायणस्यादिमं श्लोकं लिखत।**

**उत्तरम्— 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्च मिथुनादेकमवधीः काममोहितम्'॥**

**प्रश्नः २६— वर्णाः कति विद्यन्ते?**

**उत्तरम्—** ब्राह्मणक्षत्रिय वैश्यशूद्राश्चेत्याख्याश्चत्वारो वर्णाः विद्यन्ते।

Scanned with CamScanner

**प्रश्नः २७– आश्रमाः कति संख्याकाः सन्ति?**

**उत्तरम्–** ब्रह्मचर्य गृहस्थ वानप्रस्थ संन्याश्चेत्याख्याश्चत्वार आश्रमाः सन्ति।

**प्रश्नः २८– षोडश संस्काररााणां नामानि लिखत।**

**उत्तरम्–** गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूड़ाकर्म, कर्णवेधः विद्यारम्भः, उपनयनम्, वेदारम्भः केशान्तः, समावर्तनम्, विवाहः, अन्त्येटिश्चेति। यथाऽऽहः–

**गर्भाधानं पुसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमोऽन्न-प्राशनं वपनक्रिया॥**
**कर्णवेधो व्रतादेशो वेदारनम्भक्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥**

त्रेताग्निसंगृहश्चेति संस्काराः षोडश स्मृताः।

**प्रश्नः २९– विराटपुरुषस्य मुखं को विद्यते?**

**उत्तरम्–** विराटपुरुषस्य मुखं ब्राह्मणो विद्यते।

**प्रश्नः ३०– विराट्पुरुषस्य वाहू कः विद्यते?**

**उत्तरम्–** विराटपुरुषस्य वाहू राजन्यः (क्षत्रियः) विद्यते।

**प्रश्नः ३१– विराट्पुरुषस्य ऊरू कः वर्तते?**

**उत्तरम्–** विराटपुरुषस्य ऊरू वैश्यः वर्तते।

**प्रश्नः ३२– विराट्पुरुषस्य पादः कः अस्ति?**

**उत्तरम्–** विराट् पूरुषस्य पादः शूद्रोऽस्ति।

**प्रश्नः ३३– विवाहाः कति विधाः भवन्ति?**

**उत्तरम्–** ब्राह्मः, दैवः, आर्ष, प्रजापत्यः, आसुरः, गन्धर्वः, राक्षसः, पैशाचश्चेत्यष्टौ विवाहस्य भेदाः भवन्ति। यथाह मनुरपि–

**ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः।**
**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥**

**प्रश्नः ३४– 'यदिहस्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इयं सूक्तिः कुत्र समुपलभ्यते।**

**उत्तरम्–** उपर्युक्ता सूक्तिः महाभारते समुपलभ्यते।

Scanned with CamScanner

**प्रश्नः ३५— चातुर्वर्ण्यं किमाधारीकृत्य प्रवर्तते?**

**उत्तरम्—** चातुर्वर्ण्यं गुणकर्म विभागमाधारीकृत्य प्रवर्तते यथा भगवान् ब्रूते गीतायाम्— 'चातुर्वर्ण्य मया सृष्टं गुणकर्म विभागशः।'

**प्रश्नः ३६— ब्राह्मणस्य कानि कर्तव्यानि विद्यन्ते?**

**उत्तरम्—** अध्ययनम्, अध्यापनम्, यजनम्, याजनम्, दानम्, प्रतिग्रहणन्चेति ब्राह्मणस्य षट् कर्माणि विद्यन्ते।

**प्रश्नः ३७— क्षत्रियस्य किं कर्तव्यं विद्यते?**

**उत्तरम्—** शौर्यं तेजो धृतिर्दाक्ष्यं यूद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।। (गी० १८/४३)

**प्रश्नः ३८— वैश्यस्य किं कर्म वर्तते?**

**उत्तरम्—** कृषि गौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् (गी० १८/४४)

**प्रश्नः ३९— शूद्रस्य किं कर्तव्यं विनिर्दिष्टमस्ति?**

**उत्तरम्—** परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् (गी० १८/४४)

**प्रश्नः ४०— गीतानुसारेण ब्राह्मणस्य किं कर्म प्रविभक्तं विद्यते?**

**उत्तरम्—** शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्। (गी० १८/४२)

**प्रश्नः ४१— पुंसवन संस्कारः कदा भवति?**

**उत्तरम्—** पुंसवनसंस्कारो गर्भाधानानन्तरं द्रितीये तृतीयेवा मासि भवति।

**प्रश्नः ४२— नामकरण संस्कारः कदा भवति?**

**उत्तरम्—** नामकरण संस्कारो दशमें परे एकादशे अष्टादशेऽहनि वा पूर्णे मासि वा केचिदङ्गी कुर्वन्ति। यथोक्तं भविष्यत्पुराणे—

**नामधेयं दशम्यां तु केचिदिच्छन्ति पार्थिव।**
**द्वादश्यामपरे रात्र्यां मासं पूर्णे तथा परे।**
**अष्टादशेऽहनि च तथा वदन्त ये शरीरिणः।। इति।**

**प्रश्नः ४३— अन्नप्राशनं कदा शस्तं भवति?**

**उत्तरम्— पुत्रस्यान्नप्राशनं षष्ठे अष्टमे मासि वा शस्तं भवति।**
**पुत्र्यास्तु पञ्चमे एव भवति।**

Scanned with CamScanner

**प्रश्नः ४४— उपनयन संस्कारः कदा भवति?**

**उत्तरम्—** उपनयन संस्कारः ब्राह्मणस्याष्टमे वर्षे, क्षत्रियस्य एकादशे वर्षे, वैश्यस्य च द्वादशे वर्षे भवति। तथा चाह मनुः—

**गर्भाष्टमेऽब्दे कुवर्ति ब्राह्मणस्योपनायनम्।**
**गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः।। इति।**

**प्रश्नः ४५— विवाहस्याष्ट प्रकारेषु ब्राह्म विवाहः किम्प्रकारको भवति?**

**उत्तरम्—** वरमाहूयाङ्कतायाः कन्यायाः उदकपूर्ण दानं ब्राह्म विवाहो भवति।

**प्रश्नः ४६— दैव विवाहः कीदृशो भवति?**

**उत्तरम्—** विनते कर्मणि ऋत्विजे अलङ्कृत कन्यादानं दैव इत्युच्यते।

**प्रश्नः ४७— प्रजापत्य विवाहः कीदृशो भवति?**

**उत्तरम्—** सह धर्म चरत इति दान मात्रं प्राजापत्य विवाहो भवति।

**प्रश्नः ४८— आर्ष विवाह कीदृश इति लिखत।**

**उत्तरम्—** गोमिथुनग्रहणपूर्वकं कन्यादानमार्षे भवति।

**प्रश्नः ४९— गान्धर्व विवाहः कीदृश इति लिखत।**

**उत्तरम्—** कन्याकुमारयोः मिथः समयेन दानं गान्धर्व विवाहो भवति।

**प्रश्नः ५०— आसुर विवाहः कीदृशो भवति?**

**उत्तरम्—** धनमादाय कन्या विक्रय आसुर विवाहो भवति।

**प्रश्नः ५१— पैशाच विवाहः कीदृशो भवति?**

**उत्तरम्—** अपहरणं कन्यायाः पैशाच विवाहो भवति।

**प्रश्नः ५२— राक्षस विवाहः कीदृश इत लिखत?**

**उत्तरम्—** हत्वा भित्त्वा च बलादपहरणं कन्यायांः राक्षस विवाहो भवति।

**प्रश्नः ५३— विवाहस्याष्टप्रकारकेषु केषां केषां वर्णानां कृते कीदृशो विवाहः प्रशस्तो भवतीति लिखत?**

**उत्तरम्—** तत्रेयं व्यवस्था—

**चतुरो ब्राह्मणस्याधान् प्रशस्तान कवयो विदुः।**
**राक्षसं क्षत्रिय स्यैवमासुरं वैश्य शूद्रयोः।। (मनुस्मृतिः)**

Scanned with CamScanner

**प्रश्नः ५४— संस्कारेषु चरमः संस्कारः कः भवति?**

उत्तरम्— संस्कारेषु चरमः संस्कारः अन्त्येष्टि संस्कारो भवति।

**प्रश्नः ५५— वर्णविभागस्य सङ्केतः प्राथम्येन क्व समुपलभ्यते?**

उत्तरम्— वर्णविभागस्य सङ्केतः प्राथम्येन ऋग्वेदीये पुरुषसूक्ते समुपलभ्यते।

**प्रश्नः ५६— आश्रमशब्दस्य कोऽर्थः भवति?**

उत्तरम्— आश्रम्य स्वं स्वं तपश्चरन्त्यत्रेति आश्रमः शास्त्रोक्त धर्म विशेषः।

**प्रश्नः ५७— आश्रम शब्दः केन प्रकारेण निष्पद्यते?**

उत्तरम्— आङ्पूर्वश्रमधातुना आश्रम शब्दो निष्पद्यते।

**प्रश्नः ५८— 'यदिहास्ति तदन्यत्र.............' इति सुभाषितयुतं पद्यं सम्पूरयत?**

**उत्तरम्— धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्तितदन्यत्र यन्नेहास्ति न तत्क्वचित्।।**

**प्रश्नः ५९— महाभारतस्य मङ्गलरूपमादिमं पद्यं लिखत?**

**उत्तरम्— नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।।**

**प्रश्नः ६०— महाभारतस्य प्रारम्भिकं नाम किमासीत्?**

उत्तरम्— महाभारतस्य प्रारम्भिकं नाम जय आसीत्।

**प्रश्नः ६१— पुरुषस्य परं निधानं किमस्ति?**

उत्तरम्— सन्तोष एव पुरुषस्य परं निधानमस्ति।

**प्रश्नः ६२— 'वसुधैव कुटुम्बकम्' केषां कृते विद्यते?**

उत्तरम्— उदारचरितानां कृते वसुधैव कुटुम्बकंभवति। उक्तमपि—
'उदारचरितानां तु वसुधैव कुटुम्बकम्' इति।

**प्रश्नः ६३— वेदाः के न पुनन्ति?**

उत्तरम्— आचारहीनं न पुनन्ति वेदाः।

**प्रश्नः ६४— महाभारते परोपकार विषये किं लिखितमस्ति?**

**उत्तरम्— श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।**
**परोपकारः पुण्याय पापाय परपीडनम्।। इति।**

Scanned with CamScanner

प्रश्नः ६५— गीतायां शरणागतानाम् अभयत्वाय भगवान् किं प्रतिजानाति?

उत्तरम्— 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्व पापेभ्यो मोक्षयिष्यामि मा शुचः'॥

प्रश्नः ६६— अन्यायेनार्जितं वित्तं कति वर्षाणि यावत् तिष्ठति?

उत्तरम्— अन्यायेनार्जितं वित्तं दश वर्षाणि तिष्ठति।
प्राप्ते चैकादशे वर्षे समूलं तद् विनश्यति॥ इति।

प्रश्नः ६७— पुरुषार्थाः कति सन्ति, के च ते?

उत्तरम्— धर्म, अर्थः, कामः, मोक्षश्चेत्याख्याश्चत्वारः पुरुषार्थाः सन्ति।

प्रश्नः ६८— विद्या किं ददाति?

उत्तरम्— विद्या विनयं ददाति।

प्रश्नः ६९— विश्वबन्धुत्व भावनादृढीकरणात्मकं किमपि श्लोकं लिखत?

उत्तरम्— सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्। इति।

Scanned with CamScanner

# वर्णव्यवस्था

वर्णाश्रमव्यवस्था हि भारतीयसंस्कृतेरितरव्यावर्तकं वैशिष्ट्यम्। तत्र समाजस्य वर्णेषु विभाग एव वर्णविभागः, जीवनस्य हि आश्रमेषु विभाग आश्रमविभागः। उभावधिकृत्य वर्णाश्रमशब्दः प्रवर्तते। तत्र त्रयो वर्णाः—विप्रक्षत्रियवैश्यसंज्ञकाः आर्यशब्दाभिहिताश्चतुर्थः शूद्रः पञ्चमश्चान्त्यज इति। त्रय एवाश्रमाः—ब्रह्मचर्यगृहस्थवानप्रस्थसंज्ञकाश्चतुर्थः संन्यास इति।

वर्णविभागस्य सङ्केतः प्राथम्येन ऋग्वेदीये पुरुषसूक्ते लभ्यते। तत्रोक्तं यद्विराड् वै पुरुषः सहस्रशीर्षा सहस्राक्षः सहस्रपात्। तस्य हि मुखं ब्राह्मणः, बाहू क्षत्रियः, ऊरू वैश्यः पादौ च शूद्रः इति। यथा—

'ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत'॥

तस्य नाभिरन्तरिक्षं शिरो द्यौः पादौ भूमिः श्रोत्रे दिशो लोकाश्च। इत्थं हि विराजोमुखत्वेन ब्राह्मणस्य मुख्यत्वं, पादजत्वेन शूद्रस्यावरत्वम्। किन्तु एकस्यैव पुरुषस्यावयवत्वेन सर्वेषामस्तित्वं तु समानमेव। यथा हि शरीरे एकस्याप्यवयवस्य दौर्बल्येनापि तन्निष्क्रियमल्पक्रियं वा भवति तथैव तेष्वेकस्यापि दौः स्वास्थ्येन समाज एव बाधितक्रियो भवति। स्वस्वक्षेत्रे सर्वेषामेव समानं महत्त्वं बुद्धिबलधनश्रमाणाम्। यथोक्तम्—

'सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत्।
अन्योन्यगुणवैशेष्यान्न किञ्चिदतिरिच्यते॥
येषु येषु च कृत्येषु तत्तदङ्गं विशिष्यते।
येन यत्साध्यते कार्यं तत्तस्मिञ्श्रेष्ठमुच्यते॥
सप्ताङ्गस्येह राज्यस्य त्रिदण्डस्येव तिष्ठतः।
स्वस्वकार्यप्रवृत्तस्य कः केन गुणतोऽधिकः'॥

यथा हि सप्ताङ्गकं राज्यं तथैव चतुरङ्गकः समाजः, यथा हि राज्ये समानमहत्त्वानामपि अङ्गानां राज्ञः प्राथम्यं तथैव समाजे ब्राह्मणस्य।

Scanned with CamScanner

विभागोऽयमनादिकालादेव प्रचलतीति विषये तु न कस्यापि वैमत्य-मन्यत्रापि तस्यास्तित्ववर्णनात् । प्राचीने हि मिश्रमेसोपोटामियाजापानप्रभृति-समाजेऽपि एतादृश्येव व्यवस्थाऽऽसीत् । न हि सर्वे बुद्धिशालिनो भवन्ति, न च सर्वे बलोत्साहयुक्ता एव । ये हि बुद्धिबलयोराश्रयं भजन्ते ते निम्नस्तरीयं कर्म कर्तुं न प्रभवन्ति समयाभावात् । न चाल्पधी सार्वविषयिकीं धियमधि-कर्तुं प्रभवति अवैशिष्ट्यापत्तेः । ये च खलु तत्कर्मत्रितयं सम्पादयितुं न प्रभवन्ति तेषां कृते श्रम एवावशिष्यते वृत्तित्वेन । तेन चातुर्वर्ण्यं हि कर्मानुसारि प्राकृतिकञ्च । कर्मानुसृत्य गुणानां प्रवर्तनमपि स्वाभाविकमेव । माध्यन्दिनीये श्रूयते—

'उपह्वरे गिरीणां सङ्गमे च नदीनाम् । धिया विप्रो अजायत ।' (२६।१५)

'इमं देवा असपत्न सुवध्वं महते क्षत्राय.....' । ( १०।१८ )

एवमेव—

'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः' ।
( ऋ० १।१६४।४५ )

'ब्राह्मणासः पितरः सोम्यासः' । ( ऋ० ६।७५।१० )

'संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः' । ( ऋ० ७।१०३।१ )

'ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्' ।
( ऋ० ७।१०३।७ )

'यद् ब्राह्मणाः संयजन्ते सखायः' । ( ऋ० १०।७१।८ )

'ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंह' । ( वाज० ५।२७ )

'प्राणो ह वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः' । ( शत० १४।८।१४।४ )

'ओजः क्षत्रं वीर्यं राजन्यः' । ( ऐत० ८।२ )

'क्षत्रं हि राष्ट्रम्' । ( ऐत० ७।२२ )

'क्षत्रं वा एतदारण्यानां पशूनां यद् व्याघ्रः' । ( ऐत० ८।६ )

'सैषा क्षत्रस्य योनिर्यद् ब्रह्म' । ( शत० १४।४।२।२३ )

'ब्रह्मणः क्षत्रं निमित्तम्' । ( तै० ब्रा० २।८।८।९ )

'क्षत्रं वै स्विष्टकृत् क्षत्रेणैवैनमेतदभिषिञ्चति' । ( शत० १२।८।३।१९ )

'विशो वै ग्रामणीः' । ( शत० ५।३।१।६ )

'ऋग्भ्यो जातं वैश्यं वर्णमाहुः' । ( तै० ब्रा० ३।१२।९।२ )

Scanned with CamScanner

'अथ यदि दधि वैश्यानां स भक्षो वैश्यास्तेन भक्षेण जिन्विष्यसि वैश्यकल्पस्ते प्रजायामाजनिष्यते अन्यस्य बलिकृदन्यस्याद्यो यथाकामज्येयो यदा वै क्षत्रियाय पापं भवति वैश्यकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यतामभ्युपेतोः स वैश्यतया जिज्यूषितः'। ( ऐत० ७।२९ )

'नवदशभिरस्तुवत शूद्रार्यौवसृज्यतामहोरात्रेऽअधिपत्नीऽआस्ताम्'।
( वाज० १४।३० )

'शूद्रा यदर्यजारा न पोषाय धनायति'। ( वाज० २३।३० )

'शूद्रो यदर्यायै जारो न पोषमनुमन्यते'। ( वाज० २३।३१ )

'अथ यद्यपः शूद्राणां सभक्षः शूद्रास्तेन भक्षेण जिन्विष्यसि शूद्रकल्पस्ते प्रजायामाजनिष्यतेऽन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रतामभ्युपैतोः स शूद्रतया जिज्यूषितः'। ( ऐत० ७।२९ )

'असतो वा एव सम्भूतः यच्छूद्रः'। ( तै० ब्रा० ३।२।३।९ )

'अनृतं स्त्री शूद्रः श्वा कृष्णः शकुनिस्तानि न प्रेक्षेत'।
( शत० १४।१।१।३१ )

'असुर्यः शूद्रः'। ( तै० ब्रा० १।२।६।७ )

वर्णव्यवस्थामादाय कतिपये पक्षा उत्तिष्ठन्ते सम्प्रत्यपि अनिर्णीताः। ते च यथा—

१. वर्णा हि धात्रा तत्तद्वर्णत्वेन सृष्टास्तत्तत्कर्मनिर्वाहाय।
२. वर्णव्यवस्था हि कार्यविभाजनमाश्रित्य पश्चान्निर्मिता।
३. वर्णव्यवस्था ह्यादित एव जातिसम्बद्धा।
४. वर्णव्यवस्था आदौ कार्यसम्बद्धा पश्चाच्च जातित्वेन गृहीता।
५. शूद्रा हि आर्याणामेव निकृष्टसन्ततयः।
६. शूद्रा हि दासा दस्यवो ये हि निर्जिताः शूद्रत्वमुपपादिताः।
७. आदौ अन्तर्जातीयविवाहः सम्मत आसीत्।
८. आदित एव नान्तर्जातीयविवाहोऽभीष्टः।

अथाऽत्र पक्षेष्वेतेषु सङ्क्षेपेण विचार्यते। वर्णा हि आदित एव धात्रा पृथक्पृथक्त्वेन सृष्टाः। यथाहचुक्तम्—

'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः'॥

Scanned with CamScanner

तथैव मुखतो ब्राह्मणाः सृष्टाः, बाहुभ्यां राजन्यः, ऊरुभ्यां वैश्यस्तथैव पद्भ्यां शूद्रश्च सृष्टाः। यथाऽऽह मनुरपि—

'लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्तयत्' ॥
'यथाक्रमं निर्मितवानि'ति कुल्लूकः।

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् पूर्वं ब्रह्मणा सृष्टम्। तच्च कर्मभिर्वर्णतां गतमित्यपरे भृग्वादयः। एतत्पक्षानुसारेण ब्राह्मणो हि पुरुषस्य मुखं, क्षत्रियो बाहू, वैश्य ऊरू शूद्रश्च पादौ। उक्तमेव पुरुषसूक्ते—

'यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखङ्किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत' ॥

यो ब्राह्मणस्य कर्म सम्पादयति स ब्राह्मणः। एवमेव क्षत्रियादिरपि। आदौ हि नासीत्कश्चिद्वर्णविभागः, सर्वा एव ब्राह्मी प्रजाः। पश्चाच्च यथा यथा कार्यक्षेत्रं विकसितं तथा तथा वर्णविभागः प्रवर्तितः कार्यजातमनुसृत्येति। उक्तमेव वेदे—'धिया विप्रो अजायत' इति। यथा चैतरेये—

'त्रयाणां भक्षाणामेकमाहरिष्यन्ति सोमं वा दधि वापो वा स यदि सोमं ब्राह्मणानां सभक्षो ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ब्राह्मणकल्पस्ते प्रजायामाजनिष्यत आदाय्यापाय्यावसायी यथाकामप्रयाप्यो यदा वै क्षत्रियाय पापं भवति ब्राह्मणकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा ब्राह्मणतामभ्युपैतोः स ब्रह्मबन्धनेन जिज्यूषितोऽथ यदि दधि वैश्यानां सभक्षो वैश्यांस्तेन भक्षेण जिन्विष्यसि वैश्यकल्पस्ते प्रजायामाजनिष्यतेऽन्यस्य बलिकृदन्यस्याद्यो यथाकामज्येयो यदा वै क्षत्रियाय पापं भवति वैश्यकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यतामभ्युपैतोः स वैश्यतया जिज्यूषितोऽथ यद्यपः शूद्राणां सभक्षः शूद्रांस्तेन भक्षेण जिन्विष्यसि शूद्रकल्पस्ते प्रजायामाजनिष्यतेऽन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पोऽस्य प्रजायामाजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रतामभ्युपैतोः स शूद्रतया जिज्यूषितः'। इति।

केषाञ्चिन्मते वर्णव्यवस्था आदित एव जातिसम्बद्धा। ब्राह्मणस्य पुत्र एव ब्राह्मणो भवति नान्य इत्यस्याशयः। यथोक्तं वाजसनेयके—

'ब्राह्मणमद्य विदेयं पितुमन्तं पैतुमत्यमृषिमार्षेयं सुधातुदक्षिणम्।
अस्मद्राता देवत्रा गच्छत प्रदातारमाविशत' ॥ (७।४।६)

अत्र यस्य पिता ब्राह्मणः पितामहश्च ब्राह्मणः स एव ब्राह्मणो भवितुमर्हति। आर्षेय एव ऋषिर्भवति इति तद्व्याख्या। तदनुसारेण 'इममुष्य पुत्रममुष्यै विशे'। (वाज० १०।१८) इत्येतस्यायमेवाशयो यदभिषिच्यमाणो हि ऋषिकुलसम्बद्धः स्यादिति।

वर्णव्यवस्था आदौ हि कार्यसम्बद्धाऽऽसीत्पश्चाच्चैषा जात्याऽभिक्लृप्ता इत्यपरे। ते हि स्वाभिमतसमर्थनायोद्धरन्ति—

'कारुरहं ततो भिषगुपलप्रक्षिणी नना।
नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव' ॥

(ऋ० ९।११२।३)

अत्रोक्तमेकस्मिन्नेव परिवारे नानाव्यवसायाश्रयत्वं न हि वर्णस्य जातिसम्बद्धत्वसूचकम्। उत्तरवर्तिवेदेषु जन्मगते वर्णरूपेऽर्थे प्रयुक्तोऽपि ब्राह्मणशब्दः ऋग्वेदे तत्तदर्थे लभ्यते। यदि पुरुषो जन्मत एव जातिविशेषं लभेत एकस्मिन्नेव परिवारे नानाजातीयव्यवसायशीला न भवेयुः। नाप्येक एव पुरुषो नानाजातीयव्यवसायविषयकं विकल्पमातिष्ठेत। ऋग्वेदे हि सामाजिकवर्गपरकतया ब्राह्मणशब्दः प्रयुक्तः किन्तु तस्य सामाजिकवर्गस्याधारो जनिरिति न स्फुटीभवति। एवमेव तदा एकस्य वर्गस्य भोजनविवाहादिव्यवहारोऽपि स्वस्मिन्नेव वर्गे सीमित आसीदित्यपि न स्पष्टीभवति ऋग्वेदे। बृहस्पतिर्हि ब्राह्मणः सोमेन राज्ञा नीतामपि भार्यां पुनरग्रहीदित्यस्य।

'ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम्।
तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः' ॥

(ऋ० १०।१०९।५)

इति ऋग्वेदीयमन्त्रस्य अयमेवाशयो यत्तदा नान्तर्वर्गीयविवाहो निषिद्ध आसीत्।

शूद्रवर्णो हि आर्यस्यैव निकृष्टसन्ततिरासीदिति केचन मन्यन्तेऽपरे तु शूद्रो हि निर्जितो दस्युरेवेति चिन्तयन्ति। ऋग्वेदीये—'ब्राह्मणोऽस्य' (१०।९०।१२) मन्त्रे, वाजसनेयीये 'रुचं नो धेहि' (१८।४८) इति मन्त्रे, तदीये एव 'यथेमां वाचं' (२६।२) इति मन्त्रे च चत्वार एव वर्णाः स्मृताः। ईप्सितञ्च सर्वेषामेव कल्याणमिति शूद्रोऽप्यार्यान्तर्वर्त्यैव वर्गः इति प्रथमपक्ष-

Scanned with CamScanner

धराणां मतम्। द्वितीयपक्षधरास्तु तन्न मन्यन्ते। तदनुसारेण हि ऋग्वेदे द्वावेव वर्गौ दृश्येते—आर्यो दासश्च दस्युपर्यायः। तत्रार्यो यज्ञीयः शूद्रस्त्व-यज्ञीयः। यज्ञे दीक्षितस्य शूद्रेण सह सम्भाषणमपि तत्र निषिद्धम्। यदि नाम शूद्रोऽप्यार्यवर्गीय एव स्यात्तदा तस्यायज्ञीयत्वं कथमपि न भवेत्। स हि अग्निहोत्रनिमित्तं गवां दोहेऽपि अनधिकृतः। स हि वेदाध्ययनादिकर्मसु बहिष्कृतः। ‘असतो वा एष सम्भूतो यच्छूद्रः’। ( तै० ब्रा० ३।२।३।९ ) तेन हि स्पष्टमेव यच्छूद्रो हि वशीकृतो दस्युर्वा दासो वा। ऋग्वेदे इन्द्रेण दस्यूनां दासानाञ्च संहारस्य कथा पठ्यते। हतावशेषा दस्यवो हि आर्याणां दासत्वं स्वीकृत्य तत्रैव स्थिताः। ते च पश्चाच्छूद्रत्वेन स्वीकृताः। पश्चाद्वर्तिकाले शूद्रायामार्याज्जाता अपि मातृजात्या शूद्रत्वमेव प्रापिताः। अतो हि द्विविधाः शूद्राः—दस्युमूला आर्यमूलाश्चेति।

विवाहविषये एतदनुमीयते यदार्याणां पारस्परिकवैवाहिकसम्बन्धो नैव निषिद्ध आसीत्, तत्रापि ब्राह्मणस्तु सर्वत्राधिकृत आसीत्। वाजसनेयके उक्तं यत्—‘नहि अर्यजारा शूद्रा शूद्रजारा अर्या च पोषमेती’ति। ( २३।३०-३१ ) अनेन एतावदेव दृश्यते यन्न हि शूद्रस्यार्यैः सह परिणयसम्बन्धोऽनुमत आसीत्तदा।

काममृग्वेदे वर्णानां जन्मसिद्धत्वं नैव सिध्येत् किन्तु उत्तरवर्तिवैदिकसंहिता-ब्राह्मणस्मृतिपुराणादिग्रन्थेषु तु जन्मत एव जातिसिद्धिरुक्ता निषिद्धश्च वर्णानां प्रातिलोम्यविवाहः। आनुलोम्यविवाहस्तु तदापि सम्मत आसीदिति ‘सजातिजानन्तरजाः षट्सुता द्विजधर्मिणः’ इति मनुवाक्याज्ज्ञायते। अथैतेषां सङ्क्षेपेण परिचयः प्रस्तुयतेऽत्र—

**ब्राह्मणः**—ब्राह्मणो हि वर्णेषूत्तमः मुख्यश्च। स एव बुद्धेरेकाधिकारी आध्यात्मिकजीवनस्य च। शतपथब्राह्मणे हि ब्राह्मणस्य सप्त विशेषाधिकारा निर्दिष्टाः—‘ब्राह्मण्यं प्रतिरूपचर्या यशो लोकपङ्क्तिं लोकः पच्यमानश्चतुर्भि-र्धर्मैः ब्राह्मणं भुनक्त्यर्चया च दानेन चाज्येयतया चावध्यतया च’। ( ११।५।७।१ )। किन्तु तत्रैवोक्तं यत्सत्यपि सर्वज्येष्ठे न हि ब्राह्मणो राज्याया-लमिति।

काममादिमयुगे ब्राह्मणो गुणकर्मानुसारेण स्यात्किन्तु परवर्तिकाले तु ब्राह्मणस्य ब्राह्मण्यां विधिवदूढायां वा क्षत्रियायां जात एव पुत्रो ब्राह्मण्यम-वाप्नोति, ‘द्वयोरात्मा प्रजायते’ इति वचनात्। केचित्तु तदपि न मन्यन्ते, ब्राह्मण्यां जात एव ब्राह्मणपुत्रो ब्राह्मणो भवति न त्वन्य इति तेषामभिमतम्।

( याज्ञवल्क्यानुसारेण विप्रात्क्षत्रियायां मूर्द्धाविसिक्तः वैश्यायामम्बष्ठः शूद्रयां तु निषादः पारशवो वा जायते । जात्युत्कर्षस्तु मूर्द्धाविसिक्तस्य पञ्चमे युगे ( जन्मनि ) इतरयोः सप्तम एवेति । ) तेन हि ब्राह्मण्यस्य त्रयो ह्याधाराः—बीजं, योनिः कर्म च । यो हि ब्राह्मणबीजादुत्पद्यते विधिवदूढायां ब्राह्मण्यां ( मनुमते क्षत्रियायामपि ) यश्च ब्राह्मणस्य कृते विहितं कर्म करोति स एव ब्राह्मणः । 'स हि सर्वेषां प्रणम्यः । स हि भूमिदेवः । स हि भगवान्' । ( शत १४। ६।१।२ ) 'स हि सुभोजनाच्छादनादिभिरभ्यर्च्यः । स हि दानार्हः । स हि आदायी आपायी आवसायी यथाकामप्रयापी च' । ( ऐत० ७।२९ ) स हि अज्येयः अनुल्लङ्घ्यश्च । राजा सर्वस्येष्टे ब्राह्मणवर्जम् । पूतश्च स सर्वं पुनाति वदति च स पूतां वाचं चरति च शास्त्रविहिताचारान् । अहरहः स्वाध्यायमध्येति सः । तस्य हि स्वाध्यायः प्रवचनमेव तपः ।

अध्ययनं यजनं दानमिति त्रीण्यस्य कर्तव्यानि । स्वाध्यायोऽध्येतव्यः श्रौतःस्मार्तयज्ञा अनुष्ठेया देयानि च विविधानि दानानि । अध्यापनं याजनं प्रतिग्रहश्च तस्य वृत्तयः । तावता जीविकासम्भवे आपदि क्षत्रियवृत्त्याऽपि जीवेत्, महापदि वैश्यवृत्त्याऽपि किन्तु न कदापि शूद्रवृत्त्या । किन्तु आपदनन्तरं पुनः प्रकृत्यैव । त्रिविधा ब्राह्मणाः—अध्यापकः, पुरोहितस्तापसश्च । अध्यापकोऽपि द्विविधः—आचार्यो भृतकाध्यापकश्च । यो ह्युपनीय शिष्यं वेदमध्यापयति नैव गृहीत्वा किमपि स आचार्यः; यथा कण्वादयः । यश्च मासिकं दैनिकं वा नियतं वेतनं गृहीत्वा अध्यापयति स भृतकाध्यापकः । स हि श्राद्धेऽनर्हो भवति । पुरोहितो बहुविधः—आचार्यर्त्विग्घोत्रध्वर्युप्रभृतिभेदात् । आचार्यो यज्ञसम्पादकः । तत्सहायका अन्ये । तापसोऽपि बहुविधः । त्रय एव दानार्हाः परस्परश्रेयस्त्वेन । अनापदि अनन्तरवृत्त्युपजीविनोऽश्रद्धेया विशेषाधिकारानर्हाः ।

**क्षत्रियः**—ब्राह्मणादनन्तरः क्षत्रियः । स हि द्वितीयो वर्णः । क्षत्रियात् क्षत्रियायां विधिवदूढायां वैश्यायां वा जातः ( मनुमतानुसारेण ) क्षत्रियो भवति । क्षत्रियत्वेऽपि बीजयोनिकर्माणि हेतुः । क्षत्रियो वै राजन्यः । याज्ञवल्क्यानुसारेण विप्रात्क्षत्रियायां जातो मूर्द्धाविसिक्तः क्षत्रियाद्वैश्यायां जातो माहिष्यः शूद्रायां तु उग्रः सञ्जायते । रक्षा हि क्षत्रियस्य परमो धर्मः । अध्ययनं यजनं दानञ्च तस्य कर्माणि न तु याजनाध्यापनप्रतिग्रहाः । आपदि अध्यापनमपि ब्राह्मणाभावे । बलिरेव तस्य वृत्तिः । आपदि वैश्यवृत्त्याऽपि न तु शूद्रवृत्त्या । आपन्निवृत्तौ तु प्रकृत्यैव । स्वधर्मस्यानुपालनं राष्ट्ररक्षा च क्षत्रियस्य कर्म ।

Scanned with CamScanner

'वीर्यं वै राजन्यः' । (ऐत० ८।२) क्षत्रमेव राष्ट्रम् । यथारण्यानां पशूनां व्याघ्रः यथा वा वनस्पतीनां न्यग्रोधः यथा वौषधीनां व्रीहयः दूर्वा च तथैव जनेषु क्षत्रियः । क्षत्रं वै हिरण्यम् । क्षत्रमिन्द्रः । यजुर्वेदोऽस्य योनिः । अरक्षिता क्षत्रियो हि वधार्हः । स हि ब्राह्मणानाद्रियेतान्यानाज्ञापयेत् । स हि सर्वस्येष्टे ब्राह्मणवर्जम् । ब्राह्मणातिक्रमी क्षत्रियः सद्य एव विनश्यति ।

**वैश्यः**—वैश्यो हि तृतीयो वर्णः । वैश्यत्वेऽपि बीजयोनिकर्माणि हेतुः । वैश्याद्वैश्यायां जातो वैश्यः शूद्रायां तु करणः । अध्ययनं यजनं दानं वैश्यस्य कर्माणि, कृषिपशुपालनवणिज्याकुसीदानि च वृत्तयः । 'आपदि क्षत्रवृत्तिर्न तु कदापि शूद्रवृत्तिः । आपन्निवृत्तौ तु प्रकृत्यैव । कृषिकरणजन्यदोषाः खलु यज्ञेन नश्यन्ति । वैश्यो हि राज्ञे षष्ठांशं ब्राह्मणेभ्य एव एकविंशतिभागं दत्त्वा भुञ्जीतोत्पादस्य । 'विट् वै राष्ट्रस्य मेरुदण्डः । स हि अन्यस्य बलिकृत् अन्यस्याद्यः यथाकाममज्येयश्च' । ( ऐत० ७।२९ )

**शूद्रः**—शूद्रो हि चतुर्थो वर्णः । शूद्राच्छूद्रायां जातः शूद्रः संस्काररहीनः । सेवैव तस्य वृत्तिः । स्वाम्यनुगमनमेव तस्य धर्मः । स हि स्वामिकृपया जीवेत् । शूद्रायां त्रैवर्णिकैरुत्पादितोऽपि शूद्र एव निषादोग्रकरणसंज्ञकः किन्तु अदासो वेदातिरिक्तविद्याध्ययनाधिकारी च । निषादादीनां हि सप्तमे युगे जात्युत्कर्ष उक्तो मन्वादिभिः । तेन हि द्विविधाः शूद्राः—दासा अदासाश्च । दासा हि सर्वकर्मबहिष्कृताः सेवामात्रधर्माणः । अदासास्तु निर्दिष्टकर्माधिकारिणोऽपि ।

पञ्चमो वर्णश्चान्त्यजः । ते च मन्वनुसारेण रजकचर्मकारनटबुरुडकैवर्तभिल्लाः भेदश्च । अन्त्यावसायिनो यथा—

'चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः' ॥

'चर्मकारभटभिल्लरजकपुष्करनटविराटभेदचाण्डालदाशश्वपचकोलिका अन्ये गवाशनाश्चान्त्यजः' । इति वेदव्यासस्मृतौ । ( १।१२–१३ )

यद्यपि वेदसंहितायां नास्ति अस्पृश्यताया उल्लेखस्तथापि—

'चाण्डालपुक्कसम्लेच्छभिल्लपारसिकादिकम् ।
यज्ञपातकिनश्चैव स्पृष्ट्वा स्नायात्सचैलकम्' ॥

इत्युक्त्वा तेषामस्पृश्यत्वं प्रतिपादितमस्ति । तथैव ब्रह्महा सुरापः स्तेयी गुरुतल्पगश्चाकृतप्रायश्चित्ताः । आह्वायका देवलका नाक्षत्रा ग्रामयाजकाश्च

Scanned with CamScanner

महापथिकपञ्चमाः। अस्पृश्यानामपि यात्रादिषु स्पर्शो न दोषः इत्यस्पृश्यताया-रनित्यत्वमेव।

प्रतिलोमजाश्च सर्वेऽपि अस्पृश्याः सर्वधर्मबहिष्कृताः भवन्ति। क्षत्रियाद् ब्राह्मण्यां सूतः वैश्याद् वैदेहकः शूद्रात्तु चाण्डालः जायते। क्षत्रियायां वैश्यान्मागधः शूद्रात् क्षत्ता जायते। वैश्यायां शूद्रादायोगवः। एतेषामपि सङ्करेण भवन्त्यनेका जातयः, यथा माहिष्येण करण्यां रथकारः।

एवं हि भारतीया वर्णव्यवस्था चलति संहिताकालतः आरभ्य अद्यावधि। अस्य हि मूलरचना प्रकृतेः सत्त्वरजस्तमसां तारतम्येन जाताऽस्ति। तदित्थम्—

'अग्निर्देवता गायत्रीच्छन्दः रथन्तरं साम अजः पशुः विप्रो मनुष्याणाम्।
इन्द्रो देवता त्रिष्टुप् छन्दः बृहत्साम अविः पशुः क्षत्रियो मनुष्याणाम्।
विश्वेदेवा देवता जगतीच्छन्दः वैरूपं साम गावः पशुः वैश्यो मनुष्याणाम्।
..........अनुष्टुप् छन्दः वैराजं साम अश्वः पशुः शूद्रो मनुष्याणाम्।

अन्यत्र च—

'रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नः कृधि।
रुचं वैश्येषु शूद्रेषु मयि धेहि रुचा रुचम्'॥ (यजु० १८।४८)

□

५

# संस्काराः

संस्कृतपदमिव संस्कारपदमपि अनेकेष्वर्थेषु प्रयुक्तो दृश्यते । वेदेषु वैदिकसाहित्ये च संस्कृतपदस्य तु बाहुल्येन प्रयोगो लभ्यते किन्तु संस्कारपदस्य प्राथम्येन प्रयोगो जैमिनीयसूत्रेष्वेव दृश्यते । 'न संस्कृतं प्र मिमीतो गमिष्ठाऽन्ति नूनमश्विनोपस्तुतेह' ( ऋ० ५।७६।२ )। इत्यत्र पवित्रितेऽर्थे; 'न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि' ( ऋ० ६।२८।४ )। इत्यत्र परिष्कृतार्थे; 'स इदं देवेभ्यो हविः संस्कुरु साधु संस्कृतं संस्कुर्वित्येवैतदाह' ( शत० १।१।४।१० )। 'तस्मादु स्त्रीपुमांसं संस्कृते तिष्ठन्तमभ्येति' ( ३।२।१।२२ )। 'श्येनो भूत्वा परापत यजमानस्य गृहान् गच्छ तन्नौ संस्कृतम्' ( वाज० ४।३४ )। इत्यत्रापि सम्पूर्वककृधातोः प्रयोगो दृश्यते किन्तु अतिशयविशेषेऽर्थे संस्कारशब्दस्तु जैमिनिसूत्रे 'द्रव्यगुणसंस्कारेषु वादीरः' ( ३।१।३ ), 'यथार्थं वा शेषभूतसंस्कारत्वात्' ( ३।२।१६ ), 'संस्कारास्तु पुरुषसामर्थ्ये यथावेदं व्यवतिष्ठेरन्' ( ३।८।३ ); 'संस्कारश्चाप्रकरणेऽग्निवत्स्यात् प्रयुक्तत्वात्' ( ९।२।९ ), 'आवेश्येरन् वाऽर्थवत्त्वात् संस्कारस्य तदर्थत्वात्' ( ९।२।४२ ), 'परार्थे न त्वर्थसामान्यं संस्कारस्य तदर्थत्वात्' ( ९।२।४४ ), 'अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियते तादर्थ्यात्' ( १०।१।२ ), 'अपि वा शेषभूतत्वात्संस्कारः प्रतीयेत' ( १०।१।११ ) इत्यादिवाक्ये प्रयुक्तो लभ्यते । एतेषु हि प्रायः शब्दोऽयं पवित्रकरणेऽर्थे एव तिष्ठति । किन्तु 'संस्कारस्य तदर्थत्वाद् विद्याया पुरुषश्रुतिः' ( ६।१।३५ ) इत्यत्र तु संस्कारशब्द उपनयनेऽर्थे प्रयुक्तो दृश्यते । संस्कारस्य उपनयनस्येति सुबोधिन्याम् । 'द्रव्यगुणसंस्कारेषु वादीरः' ( ३।१।३ ) इति सूत्रभाष्ये शबरस्वाम्याह—'संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य' इति । तन्त्रवार्तिककारो यथा—'योग्यतांश्चादधानाः क्रियाः संस्कारा इत्युच्यन्ते' इति । योग्यता च दोषापाकरणेन नवीनगुणाधानेन च भवति । मित्रमिश्रस्त्वाह—'आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः' इति । एतदेवाऽनूद्य नित्यानन्दः संयोजयति—'गर्भाधानादौ संस्कारपदं च लाक्षणिकमि'ति । तदित्थं हि

Scanned with CamScanner

संस्कारो नाम विहितक्रियाजन्यः आत्मशरीरान्यतरातिशयविशेषः तद्धेतुत्वेन तथाविधातिशयविशेषाधायकक्रिया च । संस्कारो द्विविधः—उत्पन्नदुरितमात्र-नाशकः कर्मान्तराधिकारप्रापकश्चेति । तत्राद्यो हि बीजगर्भसमुद्भवैनो निर्बर्हणो जातकर्मादिजन्य अपरश्च उपनयनजन्यो वेदाध्ययनाधिकारापादकः । पुनश्च स द्विविधः—दोषापहारनिमित्तको गुणाधायकश्च । पुनश्च स द्विविधः—दैवो ब्राह्मश्च । दैवो हि वेदोक्त पाकहविःसोमसंस्थाः, ब्राह्मस्तु गर्भाधानादिः स्मार्तः ।

संस्कारो हि प्रतियत्ने अनुभवे मानसकर्मणि चार्थे च कोशेषु । न्यायमते तु गुणविशेषः । स च त्रिविधः—वेगस्थितिस्थापकभावनाभेदात् । वेगाख्य-संस्कारो हि मूर्तपदार्थस्थायी क्वचिद्वेगजन्यः क्वचित्कर्मजन्यश्च सः । स्थिति-स्थापकश्च पृथिव्यादिचतुःपदार्थगुणः । अयमतीन्द्रियः स्पन्दनकारणञ्च । भावनाख्यस्त्वात्मनोऽतीन्द्रियगुणः उपेक्षानात्मकनिचयजन्यः । व्युत्पत्तिश्चास्य संस्क्रियतेऽनयेति संस्कारः क्रिया । सा च दोषहाननिमित्तिका कर्माधिकारा-पादिका चेति द्विविधा । सैव संस्कारः प्रकरणेऽस्मिन् । संस्काराश्च केषाञ्चि-न्मते षोडश, परेषां मते तु पञ्चविंशतिः चत्वारिंशदपि । तत्र षोडश यथाऽऽह जातूकर्ण्यः—

'आधानपुंससीमन्तजातनामान्नचौलकाः ।
मौञ्जी व्रतानि गोदानसमावर्तविवाहकाः ।
अन्त्यं चैतानि कर्माणि प्रोच्यन्ते षोडशैव हि' ॥

अङ्गिरास्तु आग्रहायणाष्टकश्रावणीकर्माश्वयुजीकर्मप्रत्यवरोहणदर्शश्राद्ध-वेदारम्भवेदोत्सर्जनदेवपितृभूतमनुष्यब्रह्मयज्ञाश्चेति सङ्गृह्याधिकत्वेन पञ्चविंश-तिसंस्कारानाह । गौतमस्तु चत्वारिंशत्संस्कारानाह—गर्भाधानपुंसवनसीमन्तो-न्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनानि; चत्वारि वेदव्रतानि—स्नानं सहधर्मचारिणीसंयोगः; पञ्चमहायज्ञाः—अष्टकापार्वणश्रावण्याग्रहायणीचैत्र्याश्व-युजीतिः; सप्त पाकयज्ञसंस्थाः—अग्न्याधेयाग्निहोत्रदर्शपौर्णमासाः चातुर्मास्यानि आग्रहायणेष्टिः निरूढपशुबन्धश्चेति; सौत्रामणीति; सप्त हविर्यज्ञसंस्थाः—अग्निष्टोमोऽत्यग्निष्टोमोक्थ्यषोडशीवाजपेयातिरात्राः आप्तोर्याममिति सप्त सोमयज्ञसंस्थाः इति । अष्टावात्मगुणाश्च—दया सर्वभूतेषु क्षान्तिरनसूया शौच-मनायासः मङ्गलमकार्पण्यमस्पृहेति । तैश्च सम्भूय गौतममतेऽष्टचत्वारिंश-त्संस्काराः । व्यवहारे तु जातकर्मषष्ठिका-नामकरण-कर्णबन्ध-निष्क्रमण-अन्न-प्राशन-चौल-उपनयन-वेदारम्भ-समापवर्तन-विवाह-दीक्षान्त्याश्चेति त्रयोदश

संस्काराः नित्यत्वेन गृहीताः, अन्ये तु काम्यत्वेनैव। तत्रापि चूडोपनयनविवाहानां नित्यत्वमपरिहार्यम्। नामकरणसंस्कारस्यापरिहार्यत्वमावश्यककर्मार्थत्वात्। एवमेव चूडाया अपि आवश्यकशिखाधारणार्थत्वात्। उपनयनमपि नित्यमनुपनीतस्य द्विजत्वाभावात्, विवाहोऽपि नित्यः आवश्यकप्रजोत्पादनार्थत्वात्। आवश्यकत्वञ्च प्रजायाः 'जायमानो वै ब्राह्मणस्त्रिभिः ऋणवान् जायते—ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः' इति श्रुतेः। 'तस्मात्सर्वप्रयत्नेन कर्तव्यो दारसङ्ग्रहः' इति वचनाच्च।

संस्काराणामुद्देश्यमादायोक्तम्—

'गार्भैर्होमैर्जातकर्मचौलमौञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते'॥ (मनु० २।२७)

अर्थात् गर्भाधानजातकर्मचूडोपनयनादिसंस्कारैर्बीजगर्भसम्बद्धदोषपरिहारो भवति द्विजानामिति। तेन हि गर्भाधानसंस्कारो हि गर्भस्थं शिशुं वेदज्ञानार्हं सम्पादयति पुंसवनश्च गर्भं पुंसीकरोति। सीमन्तोन्नयनञ्च गर्भस्थं पित्रोः पापान्मोचयति। जातकर्मसंस्कारो हि समस्तगर्भदोषं परिहरति। एवमेव नामकरणान्नप्राशनचूडाख्यैश्च संस्कारैश्च रेतोरक्तगर्भोपघातजसमस्तदोषाः परिह्रियन्ते। उपनयनेन द्विजत्वमुत्पद्यते। व्रतैश्च स्वाध्यायः सिध्यति। विवाहेन गार्हस्थ्यं सम्पद्यते दारपूर्वको व्यवहारः। ते ते च जनं पापान्तरेभ्योऽपि मोचयन्ति। न केवलं दुरितापहारका एव संस्कारा अपितु योग्यताधायकाश्च। पूर्वे पूर्वे संस्कारा उत्तरोत्तरस्याधिकारसाधकाः। अकृतजातकर्मसंस्कारो हि नामकरणसंस्कारं नार्हति न चाविहितनामकरणसंस्कारो हि चूडामर्हति। अकृतचूडश्च नार्हति उपनयनाय। अनुपनीतो हि नार्हति व्रताय। अव्रतो हि नार्हति विवाहाय। अकृतदारो हि नार्हति गार्हस्थ्याय नैव चान्त्यसंस्काराय च। अलब्धान्त्यसंस्कारो हि नाप्नोति पितृलोकं न च पुण्यकृतान् लोकान् भजते प्रेतत्वमेवेति सर्वेषामेव संस्काराणां सप्रयोजनत्वम्। उक्तमेव—

'जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते'।

यथा च याज्ञवल्क्यः—

'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः'॥

संस्कारा हि चातुर्वर्ण्यविषया: उपनयनवर्जम् । उपनयनादिसमापवर्तनान्त-विषया: द्विजातेरेव । ते च द्विजातेर्मन्त्रत: शूद्रस्य तु मन्त्रवर्जं स्त्रियाश्च विवाहवर्जम् । यथोक्तम्—

'ब्रह्मक्षत्रविश: शूद्रा वर्णास्त्वाद्या द्विजातय: ।
निषेकाद्या: श्मशानान्तास्तेषां वै मन्त्रत: क्रिया: ।
तूष्णीमेता: क्रिया: स्त्रीणां विवाहस्तु समन्त्रक:' ॥ ( याज्ञ० )

तूष्णीमिति मन्त्रशून्यम् । उपनयनातिरिक्तसंस्कारानुवृत्तौ यम:—

'शूद्रोऽप्येवंविध: कार्यो विना मन्त्रेण संस्कृत: ।
न केनचित्समसृजत् छन्दसा तं प्रजापति:' ॥

स्त्रीणां वैवाहिकविधिरेव औपनायनिक:, पतिसेवैव गुरुकुलवास: गृह-प्रबन्धश्च तस्या अग्निपरिक्रिया । तत्र निषेकाद्युपनयनान्ता: क्रिया पित्रा कार्या:, अष्टौ संस्कारकर्माणि गर्भाधानमिव स्वयं 'पिता कुर्यात्' इत्यादि-वचनात् । गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-अभिनिष्क्रमण-अन्नप्राशन-चूडोपनयनाख्या: पितृसम्पाद्या: संस्कारा:, व्रतगोदानसमापवर्तनानि तु गुरुसम्पाद्यानि । विवाहस्तु स्वयं सम्पाद्य: अन्त्यश्च पुत्रेणेति व्यवस्था शास्त्रेषु । यत्र कुत्र कर्णवेधस्यापि संस्कारत्वेनोल्लेख: । यथाऽऽह व्यास:—

'गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधि: ।
केशान्त: स्नानमुद्वाहो विवाहाग्निपरिग्रह: ॥
त्रेताग्निसङ्ग्रहश्चेति संस्कारा: षोडश स्मृता: ।
नवैता: कर्णवेधान्ता: मन्त्रवर्जं क्रिया: स्त्रिया: ॥
विवाहो मन्त्रतस्तस्या: शूद्रस्यामन्त्रतो दश' ।

यद्यपि संस्कारा एते स्मार्तास्तथापि तेषां वैदिकत्वमपि, 'तेषां वै मन्त्रत: क्रिया' इति याज्ञवल्क्यवचनात् । अथैतेषां सङ्क्षिप्तं विवरणं प्रस्तूयतेऽत्र—

( १ ) **गर्भाधानम्**—पति: चतुर्थ्यां स्नातां भार्यां प्रयतवस्त्रामलङ्कृता-माचम्य कृतस्वस्त्ययनो मैथुनार्थमुपह्वयेत । 'षोडशर्तुनिशा: शस्ता: गर्भस्या-धानकर्मणि' । तत्रापि रजोनिवृत्तावेव गमनम् । न कदापि दिवा रात्रावपि न चतुर्दश्यष्टमीपौर्णमास्यमावास्यासु । ऋतुकालातिक्रमणापत्तौ तु तत्रापि गर्भाधानम् । तत्पूर्वं रजोदर्शनशान्ति: गायत्र्या होमश्च । ततश्च सुलग्ने रात्रौ

Scanned with CamScanner

व्रताऽऽचम्य प्राणानायम्य गणेशादीन् नत्वा सुखसुप्तायाः पत्न्याः 'विजिहीथां द्यावापृथिवी' इति मन्त्रेण ऊरू विश्लिष्टौ कृत्वा योनौ प्रजननेन्द्रियं निक्षिप्य हरिं स्मृत्वा रेतः सिञ्चेत्। मैथुनानन्तरं पुरुषस्य स्नानं स्त्रियास्तु शय्यात्यागमात्रम्। पुत्रार्थी युग्मासु दुहित्रर्थी अयुग्मासु रात्रिषु संविशेत्। तत्र षष्ठीसप्तम्यौ मध्यमे एकादशीत्रयोदश्यावधमे। अन्याः शस्ता आद्यरात्रित्रयवर्जम्—

'शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति'॥

इति वचनात्। गर्भाधानसंस्कारं विनैव गर्भधारणे प्रायश्चित्तगोदानं कृत्वा पुंसवनादिकं कार्यमिति निश्चयः। प्रत्यक्षश्रुतिमूलकोऽयं संस्कारः शतपथब्राह्मणादौ आथर्वणे च सङ्केतितत्वात्।

( २ ) **पुंसवनम्**—गर्भधारणतो द्वितीये वा तृतीये मासि पुंसवनं वीर्यवान् पुत्रः स्यादिति। संस्कारोऽयं बहुसम्मतः। अयं हि विनायकपूजनादिपूर्वकं सम्पादनीयः पित्रा। असौ हि चन्द्रमसि पुंनक्षत्रयुक्ते सति सूर्यभौमगुरुवारेषु कार्यः। पुत्र्यर्थिनाऽपि कार्य एवं गर्भे सत्त्वाधानप्रयोजनात्। केचित् पुंसवनस्याङ्गत्वेन अनवलोमनं वा गर्भरक्षणमपि संस्कारत्वेन गृह्णन्ति। भ्रूणस्य विघ्नापसारणमेवास्योद्देश्यः।

( ३ ) **सीमन्तोन्नयनम्**—सीमन्तस्य केशविभाजनस्य उन्नयनमित्यस्याभिप्रायः। गर्भाधानाच्चतुर्थे मासि संस्कारोऽयं प्रवर्त्यते। केषाञ्चिन्मते तु पुंसवनात्प्रागेवास्य प्रवर्तनम्। यदा चतुर्दश्याश्चन्द्रः पुंनक्षत्रे भवति तदैवास्य सम्पादनम्। संस्कारोऽयमग्निस्थापनपूर्वकं सम्पाद्यते। उद्देश्योऽस्य गर्भिण्याः प्रसन्नतैव। अत्र हि विधिपूर्वकं गर्भिण्याः केशसज्जा क्रियते सीमन्तविभाजनपूर्वकम्।

वसिष्ठमतानुसारेण गर्भाष्टमे मासि विष्णुबलिः। संस्कारोऽयं शुक्लपक्षे यदा चन्द्रमाः श्रवणरोहिणीपुंनक्षत्रेषु भवति तदैव सम्पाद्यते। भ्रूणबाधापसारणं सन्तानोत्पत्तिरक्षा चेत्यस्योद्देश्यः। नान्दीश्राद्धपूर्वकं होमादिकृत्यं समाप्यास्य सम्पादनमुक्तम्।

आपस्तम्बादिमते दशमे मासि आसन्नप्रसवायाः सोष्यन्तीकर्म।

( ४ ) **जातकर्मसंस्कारः**—संस्कारोऽयं जातमात्रस्य शिशोर्नालच्छेदनात् पूर्वमेव क्रियते। शिशोः गर्भाम्बुपानजनितसकलदोषनिर्वहणायुर्मेधाभिवृद्धिद्वारा बीजगर्भसमुद्भवैनोनिर्वहणार्थश्चायं संस्कारः। नान्दीश्राद्धं स्वस्तिवाचनं मधुघृतप्राशनेन मेधाजननमायुष्यकरणमभिमर्शश्चास्याङ्गानि।

Scanned with CamScanner

जन्मतः षष्ठदिने षष्ठीकर्म कर्तव्यम् । अत्र प्राधान्येन षष्ठी देवी प्रपूज्यते क्रियते च महोत्सवः । कथ्यते हि षष्ठीपूजार्थं न सूतकदोषस्तदा । उद्देश्योऽस्य शिशोरायुर्वृद्धिरेव ।

( ५ ) **नामकरणसंस्कारः**—नामकरणसंस्कारो हि जन्मनक्षत्रपादगताक्षरमादौ गृहीत्वा शिशोर्नामनिरूपणमेव । तच्च घोषवर्णयुक्तमाद्यन्तरन्तस्थमभिनिष्ठानान्तं प्रतिष्ठाकामनया द्वयक्षरं ब्रह्मवर्चसकामनया तु चतुरक्षरं स्यात् । संस्कारोऽयं केचिद्दशमे परे एकादशे अष्टादशेऽहनि वा पूर्णे मासि वाऽपीच्छन्ति । मनुस्तु प्राधान्येन एकादशेऽह्नि गौणतया त्रयोदशेऽह्नि संस्कारमिमं निर्दिशति । सामान्यतः एकादशेऽह्नि एवास्य प्रचलनं 'नामधेयं दशम्यां तु' इति मनुवाक्यस्य दशम्यामतीतायामित्यर्थमादाय । नाम च—

'मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् ।
वैश्यस्य धनसंयुक्तं शूद्रस्य जुगुप्सितम्' ॥

स्त्रीणां तु अयुग् दान्तं च यथा नर्मदा । नामकरणञ्च पूर्वाह्णे शस्तं मध्याह्ने मध्यमं न तु कदाऽपि अपराह्णे वा रात्रौ । पिता नाम कुर्यात्तदभावे तदन्यः कश्चित्सन्निहितः सम्बन्धी जनः पुरोहितो वा । अग्निस्थापनहोमपूर्वकं नामकरणम् । नाम च ब्राह्मणस्य शर्मान्तं, क्षत्रियस्य वर्मान्तं, वैश्यस्य गुप्तान्तं शूद्रस्य दासान्तञ्च ।

( ५ ) **निष्क्रमणम्**—शिशुं गृहाद् बहिरानीय सूर्यदर्शननिमित्तसंस्कारो निष्क्रमणसंज्ञकः । निष्क्रमणञ्च शङ्खलिखितानुसारेण तृतीये याज्ञवल्क्यानुसारेण चतुर्थे मासि कर्तव्यं कृष्णपक्षेऽन्त्यत्रिकवर्जम् । तत्र दीपकलशगणेशपूजनस्वस्तिवाचनादिमाङ्गलिककृत्यपूर्वकं शिशुमादाय गृहान्निष्क्रम्य सूर्यं सम्पूज्य शिशुना सूर्यदर्शनं कारयित्वा देवतालयं नीत्वा शिशुं सम्पूज्य देवताः प्रदक्षिणां कृत्वा च तं प्रतिवेशिगृहं सति सम्भवे मातृश्वसृगृहं वा मातुलगृहं नीत्वा तत्र क्षणं स्थित्वा सर्वैरभिनन्दितं दत्ताशिषञ्च तं गृहं प्रवेशयेदिति ।

अष्टमे मासि भूमावुपवेशनमित्येके । तत्र पिता माता वा मङ्गलाचरणस्वस्तिवाचनदीपकलशगणेशवराहपृथिव्यादिपूजनपूर्वकं ग्रहपूजनं च विशेषेण भौमस्य पूजनं कृत्वा गोमयोपलिप्ते भूभागे मण्डलं विधाय गीतवादित्रशङ्खादिध्वनिघोषपुरःसरं शिशुं तत्रोपवेशयेदिति ।

( ६ ) **अन्नप्राशनम्**—षष्ठे वाऽष्टमे मास्यन्नप्राशनं पुत्रस्य, पुत्र्यास्तु पञ्चमे एव । अग्निस्थापनादिकर्मनिमित्तकहोमपूर्वकं शुभलग्ने शुभांशके सौवर्णे वा

Scanned with CamScanner

स्वर्णपात्रे स्थापितं क्षीरपक्वान्नमधुघृतमिश्रं पिता माताऽन्ये च प्राशयेयुः । अन्नप्राशनात्पूर्वं प्राशयेन्मातुलोऽपि च इति शिष्टाचारः ।

तद्दिने एव जीविकापरीक्षाऽपि । प्राशितान्नस्य शिशोः पुरतो विविधानि जीविकापरीक्षार्थकानि भाण्डानि वस्तूनि च स्थाप्यानि । तत्र स्वयं शिशुर्यदेव वस्तु प्रथमं स्पृशति तेनैव तस्य जीविका भविष्यतीति शिष्टोक्तिः ।

(७) **चूडाकर्म**—जन्मतः प्रथमे द्वितीये तृतीये पञ्चमे सप्तमे नवमे एकादशे वाऽपि वर्षे द्विजानां चूडाकर्मेति शिष्टाः । तत्र तृतीये वर्षे शुभं, पञ्चम-सप्तमवर्षयोर्मध्यमं, नवमैकादशयोरधमम् । केचिदुपनयनेन सहैवाऽपि चूडा-कुर्वन्ति । अधिकांशमनीषिणः तृतीये एव वर्षे तदिच्छन्ति जन्मतः । 'जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छन्ति पण्डिताः' इति प्रयोगपारिजाते नारदवचनस्मरणात् । मनुरपि यथा—

'चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्' ॥

आश्वलायनोऽपि—

'तृतीये वत्सरे चौलं कुर्वीतास्योत्तरायणे ।
शुक्लपक्षे शुभर्क्षे तु कृत्वाऽभ्युदयिकं तथा' ॥

तच्च जन्मनक्षत्रमासलग्नं विहाय शुभे दिने आभ्युदयिकादिपूर्वकं कार्यम् । विधिवदग्निं संस्थाप्य हुत्वा चेष्टाहुतीः प्रथमं ब्राह्मणद्वारा ततश्चान्यद्वाराऽपि क्षौरं कार्यं शिखावर्जम् ।

शिखासम्बद्धत्वात्संस्कारोऽयं स्वपूर्ववर्तिसंस्कारापेक्षया महनीयतरः । अयमेव द्विजत्वस्यारम्भद्वारम् । जातकर्मादिसंस्कारा यदि कारणात्स्वकाले नैव सम्पन्नाश्चेत् एतदर्वाक् प्रायश्चित्तपूर्वकं कार्याः । मातरि रजोवत्यां वा गर्भिण्यां तु क्षौरो नैव कार्यः शिशोः पञ्चमासादधस्तात्तु न दोप इत्येके ।

पञ्चमेऽब्देऽक्षरारम्भः सरस्वतीविनायकादिपूजनपुरःसरम् । यथोक्तम्—

'प्राप्ते तु पञ्चमे वर्षे अप्रसुप्ते जनार्दने ।
षष्ठीं प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम् ॥
रिक्तां पञ्चदशीञ्चैव सौरभौमदिने तथा ।
शुभे सुनिश्चिते काले विद्यारम्भं तु कारयेत्' ॥

(८) **उपनयनम्**—उपनयनं हि स्वयमपि संस्कारपदेनापि ज्ञायते । यथा

Scanned with CamScanner

संस्कृत इति कृतोपनयनः। उपनयनं हि द्वितीयं जन्म, तेन कृतोपनयनो हि द्विज उच्यते। यथोक्तम्—

'जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते'।

ब्राह्मणस्य हि गर्भतो जन्मतो वा पञ्चमे वाऽष्टमे वर्षे क्षत्रियस्य गर्भादेकादशे वैश्यस्य तु गर्भाद् द्वादशे वर्षे उपनयनकालो मुख्यः। किन्तु बलार्थिनः क्षत्रियस्य जन्मतः षष्ठे धनार्थिनो वैश्यस्याष्टमेऽपि उपनयनम्। गौणकालस्त्वस्य ब्राह्मणस्याषोडशात् क्षत्रियस्य आद्वाविंशात् वैश्यस्य आचतुर्विंशात् यत ऊर्ध्वं पतितसावित्रिका भवन्ति भवति च तेषां व्रात्यता च। एतादृशा एव द्विजबन्धवः। उपनयनञ्च नान्दीश्राद्धपुरःसरं विधिवदग्निं संस्थाप्य तत्राहुतीर्हुत्वा कार्यम्। तच्च पूर्वाह्णे मुख्यं मध्याह्ने मध्यमं अपराह्णे त्ववरम्। कुसमये उपनीतः पुनः संस्कारमर्हति। तत्सम्पादयिता यथा गर्गः—

'पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः।
उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः'॥

संस्कारोऽयं द्विमुखः बीजगर्भादिदोषापहारकः कर्माधिकारापादकश्च। उपनीत एव वेदानध्येतुमर्हति व्याकरणादितरङ्गानि च। कृतोपनयनो ब्रह्मसूत्रं धारयति एकमेव। यथोक्तम्—

'उपवीतं वटोरेकं द्वे यथेतरयोः स्मृते।
एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः'॥

अथ पुनरुपनयनम्। वेदान्तराध्ययनं चिकीर्षुः कुकालोपनीतः अभक्ष्यभोजनदूषितः कृतौर्ध्वदैहिकः किन्तु जीवन्नागतः निषिद्धक्षेत्रगामी च पुनः संस्कारमर्हति। पुनरुपनयने न कालनियमो न चाजिनमेखलादण्डभैक्षचर्याव्रतानि चेति पराशरः। अन्ये तु पुनः संस्कारेऽपि सर्वेतिकर्तव्यतां निर्दिशन्ति—

'कृतोपनयनः स्वाध्यायार्थं गुरुमुपासीत।
ब्रह्मचर्यं तपो भैक्ष्यं सन्ध्ययोरग्निकर्म च॥
स्वाध्यायो गुरुवृत्तिश्च चर्येयं ब्रह्मचारिणः।
मधुमांसाञ्जनोच्छिष्टशुक्लस्त्रीप्राणिहिंसनम्॥
भास्करालोकनाश्लीलपरिवादादि वर्जयेत्।
मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटी॥
सामगानां तु सशिखं वपनमास्नानात्।
नादर्शं वै समीक्षेत नाऽऽचरेद् दन्तधावनम्'॥

इति ब्रह्मचारिधर्माः। आदौ स्वाध्यायोऽध्येतव्यः।

द्विविधा हि स्त्रियः—ब्रह्मवादिन्यः सद्योवध्वश्च। ब्रह्मवादिनीनामुपनयनं [अ]ग्नीन्धनं वेदाध्ययनं स्वगृहे भैक्ष्यञ्च। सद्योवधूनां तु उपस्थिते [वि]वाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कार्यः। ब्रह्मवादिनीमादाय यमः—

'पुरा काले कुमारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवाचनं तथा॥
पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः।
स्वगृहे चैव कन्याया भैक्षचर्या विधीयते॥
वर्जयेदजिनं चीरं जटाधारणमेव च'।

यच्च मनुयाज्ञवल्क्यादीनाम् 'अमन्त्रकं क्रियाः स्त्रीणामि'ति वाक्यं तच्चू-[डा]न्तमात्रविषयकम्। यच्च—

'वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया'॥

इति मनुवाक्यं तत्सद्योवधूविषयकमेव। तेन हि कुमार्या अपि उपनयनं शस्तं यदि सा ब्रह्मवादिनीत्वं वाञ्छति। स्त्रीणां कृते विवाहस्यापि औपनायनिकत्वेन संस्कारवति पुनः सजातीयसंस्कारानुपपत्त्या न हि ब्रह्मवादिन्या विवाहः सद्यो-वधूनाञ्च पुनर्विवाहः शस्तः। पुरुषस्य तु न दोषः अतथात्वात्। शूद्रोऽनुपने-यस्तस्यैकजातित्वात्। ब्राह्मणवीर्यतः स्वक्षेत्रे जातानां ब्राह्मणीक्षत्रियावैश्या-सुतानामपि संस्कारोऽयं प्रवर्तते, केषाञ्चिन्मते शूद्रासुतस्यापि वीर्यस्य प्राधान्यात्। एवं क्षत्रियवीर्यतः स्वक्षेत्रे वैश्यवीर्यतः स्वक्षेत्रे एव जातानामपि किन्तु प्रति-लोमजानां तु नायं संस्कारः शस्तः। न च द्विजवीर्यादपि परक्षेत्रजानां नियोगा-दृते। द्विजबन्धूनां संस्कारार्हानर्हत्वविषये मनीषिणो हि विचारद्वैविध्यं भजन्ते। द्विजवीर्यतः स्वक्षेत्रे जाताः संस्कारवर्जिता वा संस्कृता अपि पतिताः अकृत-प्रायश्चित्ता एव द्विजबन्धुशब्देन ज्ञायन्ते। कोषकारैर्द्विजबन्धुशब्दस्य द्विजस्य बन्धुरिव इति विग्रहं कृत्वा तस्य अब्राह्मणः निकृष्टद्विज इत्यर्थमादाय निदर्श-नत्वेन भट्टदेवज्ञादिः प्रस्तुतः। उपनयनकालेऽतीते व्रात्यस्तोमं प्रायश्चित्तं कृत्वो-पनयनस्य विधानं वसिष्ठमते दृश्यते। यस्य वा पितामहादयोऽप्यनुपनीतास्तेषा-मिच्छतां प्रायश्चित्तेन शुद्धिः पुनः संस्कारश्च प्रवर्तते। तदुत्पन्नस्य तु प्रकृतिवत् (वी० मि० सं० ३५३ पृ०)। एवमेवानुलोमजानामपि उपनयनमुक्तं मनुना। यथा—

'सजातिजानन्तरजाः षट् सुता द्विजधर्मिणः'।

अत्र सजातीयाः त्रयश्चानुलोमजाः इति षट् सुताः। तत्र कुल्लूकभट्टो व्याख्याति—द्विजातिसमानजातीयासु जाताः तथानुलोम्येनोत्पन्नाः ब्राह्मणेन क्षत्रियावैश्ययोः क्षत्रियेण वैश्यायामेव षट् पुत्रा द्विजधर्मिण उपनेयाः। 'तानननन्तरनाम्नस्तु' ( अ० १० श्लो० १४ ) इति यदुक्तं तत्तज्जातिव्यपदेशार्थं न संस्कारार्थमिति कस्यचिद् भ्रमः स्यादत एषां द्विजातिसंस्कारार्थमिदं वचनम्। ये पुनरन्ये द्विजात्युत्पन्ना अपि सूतादयः प्रतिलोमजास्ते शूद्रधर्माणो नैषामुपनयनमस्ति'। इति।

ब्रह्मचर्यं वेदाध्ययनं भैक्षचर्या गुरुसेवा सावित्र्युपासनमग्नीन्धनपूर्वकं सायम्प्रातर्होमश्च ब्रह्मचारिव्रतानि। उपनीतो हि गुरुकुलं व्रजेत्। तत्र गुरुमभ्युपेत्य स्वाध्यायं पठेत्। वृत्त्यर्थमहरहर्भैक्ष्यमाचरेत्। सायं-प्रातः दण्डवत्स्नातः सावित्र्युपासनपूर्वकं जुहुयात्। समाप्तविद्यः गुरवेऽभीष्टं समर्प्याभ्यनुज्ञातः गोदानपूर्वकं क्षौरं विधाय स्नायादिति ब्रह्मचारिकृत्यसारः।

( ९ ) **वेदारम्भः**—वेदस्य स्वाध्यायस्य आरम्भो हि वेदारम्भः, प्रथमं स्वाध्यायमेव पठेदिति वचनात्; 'अधीत्य शाखामात्मीयां परशाखां ततः पठेत्' इत्यादिनिर्देशाच्च। मनुराह—

'चर्याविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना'॥

अध्ययनविधिश्च यथा निर्दिष्टो मनुना—

'प्राक्कूलात्पर्युपासीनः पवित्रैश्चैव पावितः।
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति'॥

मन्त्रारम्भे पाठान्ते च प्रणवमुच्चरेत्। गुरूपदिष्टविधिना स्वाध्यायं पठेदनध्यायवर्जम्। अनध्यायो द्विविधो नित्यनैमित्तिकभेदेन। नित्या हि अमावास्याचतुर्दशीपौर्णमास्यष्टकाः प्रतिपच्च त्रयोदश्यां प्रदोषश्च। एवमेव महानिशा महानवमी महाद्वादशी महाभरणी—अक्षयतृतीया च रथसप्तमी च। एवं युगादिमन्वादि सोपपदतिथयश्च चातुर्मास्यद्वितीयाश्च। नैमित्तिकानध्यायाश्च सप्तत्रिंशदीरिताः। निमित्तमादाय प्रवर्तन्ते इति नैमित्तिकाः।

वेदाध्ययनानन्तरं चत्वारि वेदव्रतानि कार्याणि। महानाम्नीमहाव्रत-उपनिषद्गोदानाख्यानि प्राजापत्यसौम्याग्नेयवैश्वदेवाख्यानि वा वर्षव्यवधानेनानुष्ठेयानि। गोदानस्यैव केशान्त इति संज्ञाऽपि।

Scanned with CamScanner

'चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्रियस्यैवमासुरं वैश्यशूद्रयोः' ॥ इति मनुः ।

कन्यायाः अष्टमवर्षादारभ्य द्वादशवर्षपर्यन्तमुद्वाहकालः, द्वादशवर्षानन्तरमप्यपरिणीतायाः वृषलीत्वकथनात् । यथाऽऽह देवलः—

'वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी या रजस्वला' ॥

वधूवरयोर्न्यूनतममपि दशवर्षमधिकतमत्वेन विंशतिवर्षं वयसोऽन्तरं शस्तम् । समानवयस्कयोरुभयोरेव प्रौढत्वाभावात् । कन्यादानेऽधिकारी यथा निर्दिष्टं याज्ञवल्क्येन—

'पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः' ॥

अन्ये तु पितृपितामहमातृभ्रातृसकुल्यानां पूर्वाभावे परस्याधिकारं मन्यन्ते । यदि च दाता न ददाति तदा ऋतुत्रयमुपास्य कन्या स्वयं वरं कुर्यात्तथा नाऽस्या धर्मो हीयते । बौधायनस्तु—'त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् । ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्' ॥ इत्यनुशास्ति । व्यवस्थेयं दातृसद्भावे तदभावे तु कन्या अनृतुमत्यपि स्वयं भर्तारमर्जयेदेवेति स्मृतिवचनम् । विवाहश्च आभ्युदयिकगोदानग्रहशान्त्यग्निस्थापनहोमादिपूर्वकं कार्यः । वस्तुतस्तु साप्तपदीनविधिरेव विवाहः । पतित्वं हि सप्तपद्यनन्तरमेवोत्पद्यते ।

कन्या हि सकृत्प्रदीयते न तेन दत्ताया अपहार इष्टः । विवाहस्तदैव सम्भवति यदि कन्याऽनुमन्यते । न हि बलात्कन्यादानं शस्तम् । तेनैव मनुर्हि 'यदि कन्याऽनुमन्यते' इति वाक्यं प्रयुनक्ति । स्त्रीपुंसयोर्विवाहोऽविच्छेद्यः । किञ्च विवाहो नाम संस्कारविशेषजनिका क्रिया । कृतो हि संस्कारो विधिसम्मतश्चेन्न निवर्तते । यच्च सगोत्रां समानप्रवरां प्रमादादूढ्वाऽपि तस्यास्त्यागः पुनर्विवाहश्चोक्तः कात्यायनेन, तत्तु सगोत्रायां संस्कारस्यैवानुत्पादनात् ।

कृतदारो हि गृहे वसेत् । यस्मिन्नग्नौ वध्वा लाजाहोमो विधीयते तमेवादाय पाकयज्ञाः सभार्यः सम्पादयेत् । सोऽग्निः स्मार्त आवसथ्याख्यः । जाते च पुत्रे श्रौताग्न्यावादधीत आहवनीयगार्हपत्यसंज्ञकौ । तयोः सम्पादयेत् सोमहविर्यज्ञान् । इत्थं हि त्रयोऽग्नयः सेव्याः यावद्गार्हस्थम् । वानप्रस्थेऽपि अग्नीन् सहैवादाय गन्तव्यम् ।

गृहस्थो हि प्रत्यहं नित्यनैमित्तिककर्माणि सम्पादयेत् पञ्चमहायज्ञांश्च । उदयास्तमयं यावन्न विप्रः क्षणिको भवेत् । प्रातः स्मरणं मैत्रं स्नानं सन्ध्या होमो ब्रह्मयज्ञः दानञ्चेति प्रातःकृत्यानि सूर्योदयात्प्रागेव सम्पाद्यानि । अह्नः प्रथमे यामे देवपूजा द्वितीये स्वाध्यायस्तृतीये लोकयात्रा चतुर्थे स्नानसन्ध्या-पूजादि माध्याह्निककर्माणि पितृतर्पणं बलिवैश्वदेवः देवयज्ञः ब्रह्मयज्ञः भूतयज्ञः पितृयज्ञो मनुष्ययज्ञश्चेति पञ्चमे संविभागो भोजनञ्च षष्ठसप्तमयोः शास्त्रा-भ्यासो लोकमात्रा देवादिदर्शनञ्च अष्टमे स्नानसन्ध्याहोमदेवपूजादि सायाह्निक-कृत्यानि । रात्रेस्तां चतुर्धा विभज्य तत्र प्रथमे यामे स्वाध्यायो लघ्वाहारश्च द्वितीयतृतीययोः सुखस्वापश्चतुर्थे तु प्रबोधनमिति गृहस्थस्य दैनिकचर्या । अतिथिसेवा हि तस्य परमो धर्मः । आश्रमान्तरसंरक्षणमेव तस्य सर्वोत्कृष्टो धर्मः ।

( १२ ) **दीक्षासंस्कारः**—कस्यापीष्टदेवस्य सविधि जपनीयमन्त्रग्रहणं गुरोः दीक्षेत्युच्यते । संस्कारोऽयमपि अग्निस्थापनपूर्वकं कार्यः ।

( १३ ) **अन्त्येष्टिः**—प्राणानां शरीरत्यागानन्तरं पुत्रादिभिर्यः खलु संस्कारो मृतशरीरदाहादिपारलौकिकः क्रियते स एवान्त्येष्टिः । शवदाहः प्रेतकर्म सपिण्डीकरणञ्चेत्यस्याङ्गानि वार्षिकश्राद्धञ्च ।

इत्थं हि निषेकादिश्मशानान्ताः संस्काराः सम्पाद्यन्ते वैदिकमन्त्रोच्चारण-पूर्वकं द्विजस्य शूद्रस्य स्त्रियाश्च मन्त्रवर्जमेव यत्र नोपनयनं शूद्रस्य विवाहे स्त्रिया अपि मन्त्रोच्चारणमपवादो । असंस्कृतो हि पतितो भवति नेहामुत्र च मोदते इति । यथोक्तम्—

'नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः ।
सप्तैवाश्रयणाद्याश्च संस्कारा वार्षिका मताः ॥
मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकम् ।
महायज्ञाश्च नित्याः स्युः सन्ध्यावच्चाग्निहोत्रवत् ॥
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ।
गार्भैर्होमैर्जातकर्मचूडामौञ्जीनिबन्धनैः ॥
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते' । □